# १२. पादुका सहस्रम् - पुष्प पद्धतिः (३०)

शौरेः सञ्चार कालेषु पुष्पवृष्टि र्दिवश्च्युता ।
पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम् ॥ १२.१॥ ३२१॥

दैवतं मम जगत्त्रयार्चिता दिव्य दम्पति विहार पादुका ।
पाणिपाद कमलार्पणात् तयोर्या भजत्यनुदिनं सभाजनम् ॥ १२.२॥ ३२२॥

तव रङ्गराज मणिपादु नतो विहितार्हणः सुरसरित्पयसा ।
अवतंस चन्द्रकलया गिरिशो नवकेतकीदल मिवार्पयति ॥ १२.३॥ ३२३॥

कुसुमेषु समर्पितेषु भक्तैः
त्वयि रङ्गेश पदावनि प्रतीमः ।
शठकोप मुनेस्त्वदेक नाम्नः
सुभगं यत् सुरभि त्वमस्य नित्यम् ॥ १२.४॥ ३२४॥

पदे परस्मिन् भुवने विधातुः
पुण्यैः प्रसूनैः पुलिने सरय्वाः ।
मध्ये च पादावनि सह्य सिन्धोः
आसीच्चतुःस्थान मिवार्चनं ते ॥ १२.५॥ ३२५॥

तवैव रङ्गेश्वर पादरक्षे सौभाग्य मव्याहत माप्तुकामाः ।

सुरद्रुमाणां प्रसवैः सुजातैः अभ्यर्चयन्त्यप्सरसो मुहुस्त्वाम् ॥ १२.६॥  ३२६॥

निवेशितां रङ्गपतेः पदाब्जे मन्ये सपर्यां मणिपादरक्षे ।
त्वदर्पणा दापतिता मपश्यद् गाण्डीव धन्वा गिरिशोत्तमाङ्गे ॥ १२.७॥३२७॥

पत्राणि रङ्गनृपते र्मनिपादरक्षे
द्वित्राण्यपि त्वयि समर्प्य विभूतिकामाः ।
पर्याय लब्ध पुरुहूत पदाः शचीनां
पत्राङ्कुराणि विलिखन्ति पयोधरेषु ॥ १२.८॥ ३२८॥

निर्वर्तयन्ति तव ये निचितानि पुष्पैः
वैहारिकाण्युपवनानि वसुन्धरायाम् ।
कालेन ते कमल लोचन पादरक्षे
क्रीडन्ति नन्दनवने कृतिनः पुमांसः ॥ १२.९॥ ३२९॥

अर्चन्ति ये मुरभिदो मणिपादरक्षे
भावात्मकै रपि परं भवतीं प्रसूनैः ।
मन्दार दाम सुभगै र्मुकुटै रजस्रं
बृन्दारकाः सुरभयन्ति पदं तदीयम् ॥ १२.१०॥ ३३०॥

अस्पृष्ट दोष परिमर्ष मलङ्घ्य मन्यैः
हस्तापचेय मखिलं पुरुषार्थ वर्गम् ।

चित्रं जनार्दन पदावनि साधकानां
त्वय्यर्पिताः सुमनसः सहसा फलन्ति ॥ १२.११॥ ३३१॥

वन्दारुभिः सुरगणै स्त्वयि संप्रयुक्ता
माला विभाति मधुसूदन पादरक्षे ।
विक्रान्त विष्णुपद संश्रय बद्ध सख्या
भागी रथीव परिरम्भण काङ्क्षिणी ते ॥ १२.१२॥ ३३२॥

ये नाम रङ्गनृपते र्मणिपादुके त्वां
अभ्यर्चयन्ति कमलै रधिकर्तु कामाः ।
आरोपय त्यवहिता नियतिः क्रमात् तान्
कल्पान्तरीय कमलासन पत्रिकासु ॥ १२.१३॥ ३३३॥

त्वय्यर्पितानि मनुजै र्मणिपादरक्षे
दूर्वाङ्कुराणि सुलभान्यथवा तुलस्यः ।
साराधिकाः सपदि रङ्ग नरेन्द्र शक्त्या
संसार नागदम नौषधयो भवन्ति ॥ १२.१४॥ ३३४॥

आराध्य नून मसुरार्दन पादुके त्वां
आमुष्मिकाय विभवाय सहस्रपत्रैः ।
मन्वन्तरेषु परिवर्तिषु देवि मर्त्याः
पर्यायतः परिणमन्ति सहस्रनेत्राः ॥ १२.१५॥ ३३५॥

धन्यैस्त्वयि त्रिदश रक्षक पादरक्षे
पुष्पाणि काञ्चन मयानि समर्पितानि ।
विस्रंसिना विनमतो गिरिशोत्तमाङ्गात्
आरग्वधेन मिलितान्य पृथग्भवन्ति ॥ १२.१६॥ ३३६॥

विश्वोपसर्ग शमनं त्वयि मन्यमानैः
वैमानिकैः प्रणिहितं मणिपादरक्षे ।
पद्मासहाय पदपद्म नखार्चिषस्ते
पुष्पोपहार विभवं पुनरुक्तयन्ति ॥ १२.१७॥ ३३७॥

नाकौकसां शमयितुं परिपन्थि वर्गान्
नाथे पदं त्वयि निवेशयितुं प्रवृत्ते ।
त्वत्संश्रितां विजहत स्तुलसीं वमन्ति
प्रस्थान काहल रवान्प्रथमं द्विरेफाः ॥ १२.१८॥ ३३८॥

रङ्गेश पाद परिभोग सुजात गन्धां
संप्राप्य देवि भवतीं सह दिव्यपुष्पैः ।
नित्योपदर्शित रसं न किलाद्रियन्ते
नाभी सरोज मपि नन्दन चञ्चरीकाः ॥ १२.१९॥ ३३९॥

प्रागेव काञ्चन पदावनि पुष्पवर्षात्

संवर्तिते शमित दैत्यभयैः सुरेन्द्रैः ।
पद्मेक्षणस्य पदपद्म निवेशलाभे
पुष्पाभिषेक मुचितं प्रतिपद्यसे त्वम् ॥ १२.२०॥ ३४०॥

दिशिदिशि मुनिपत्न्यो दण्डकारण्य भागे
न जहति बहुमाना न्नून मद्यापि मूलम् ।
रघुपति पदरक्षे त्वत्परिष्कार हेतोः
अपचित कुसुमाना माश्रमानो कहानाम् ॥ १२.२१॥ ३४१॥

घटयसि परिपूर्णान् कृष्णमेघ प्रचारे
कृतिभि रुपहृतैस्त्वं केतकी गर्भ पत्रैः ।
वरतनु परिणामा द्वामतः श्यामलानां
प्रणति समय लग्नान्पादुके मौलिचन्द्रान् ॥ १२.२२॥ ३४२॥

परिचरण नियुक्तैः पादुके रङ्गभर्तुः
पवन तनय मुख्यै रर्पितां त्वत्समीपे ।
विनत विधि मुखेभ्यो निर्विशेषां द्विरेफाः
कथमपि विभजन्ते काञ्चनीं पद्म पङ्क्तिम् ॥ १२.२३॥ ३४३॥

विधि शिव पुरुहूत स्पर्शितै र्दिव्य पुष्पैः
त्वयि सह निपतन्त स्तत्त दुद्यान भृङ्गाः ।
मधुरिपु पदरक्षे मञ्जुभिः स्वै र्निनादैः

अविदित परमार्थान् नून मध्यापयन्ति ॥ १२.२४॥ ३४४॥

प्रशमयति जनानां संज्वरं रङ्गभर्तुः
परिसर चलितानां पादुके चामराणाम् ।
अनुदिन मुपयातै रुत्थितं दिव्य पुष्पैः
निगम परिमलं ते निर्विशन् गन्धवाहः ॥ १२.२५॥ ३४५॥

अखिल भुवन रक्षा नाटिकां दर्शयिष्यन्
अनिमिष तरुपुष्पै रर्चिते रङ्गमध्ये ।
अभिनय मनुरूपं शिक्षयत्यात्मना त्वां
प्रथम विहित लास्यः पादुके रङ्गनाथः ॥ १२.२६॥ ३४६॥

अगलित निजरागां देवि विष्णोः पदं तत्
त्रिभुवन महनीयां प्राप्य सन्ध्यामिव त्वाम् ।
भवति विबुध मुक्तैः स्पष्ट तारानुषङ्गं
परिसर पतितैस्ते पारिजात प्रसूनैः ॥ १२.२७॥ ३४७॥

व्यञ्जन्त्येते विभव मनघं रञ्जयन्तः श्रुतीर्नः
प्राध्वं रङ्ग क्षितिपति पदं पादुके धारयन्त्याः ।
नादैरन्त र्निहित निगमै र्नन्दनोद्यान भृङ्गा
दिव्यैः पुष्पैः स्नपित वपुषो देवि सौस्नातिकास्ते ॥ १२.२८॥ ३४८॥

किं पुष्पैस्तुलसीदलै रपि कृतं दूर्वाऽपि दूरे स्थिता
त्वत्पूजासु मुकुन्द पादु कृपया त्वं कामधेनुः सताम् ।
प्रत्यग्राहृत दर्भ पल्लव लव ग्रासाभिलाषोन्मुखी
धेनुस्तिष्ठतु सा वसिष्ठ भवन द्वारोप कण्ठस्थले ॥ १२.२९॥ ३४९॥

चूडारग्वध रजसा चूर्णस्नपनं विधाय ते पूर्वम् ।
रङ्गेश पादुके त्वां अभिषिञ्चति मौलिगङ्गया शम्भुः ॥ १२.३०॥ ३५०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
पुष्प पद्धति द्वादशी ॥